CONTENTS

नलचरितम्*

[कलिकल्मषघ्नम्]

राजासीद् वीरसेनो निषधविषयजस्तत्तनूजो नलोऽभूद्
वैदर्भाद् भीमसंज्ञात् तदनु च दमयन्त्याह्वया कन्यकासीत् ।
तावन्योन्यं सकामौ प्रणयपरवशौ तत्तयोः प्रेमबन्धं
वेत्तुं दूता बभूवुर्निखिलगुणगणग्राहिणो राजहंसाः ॥१॥

भीमोऽस्वस्थां च दृष्ट्वा दुहितरमथ तां यौवनस्थां विदित्वा
भर्तारं सा वृणोतु स्वयमिति नृपतीनानिनायाथ दिग्भ्यः ।
तत्रागच्छन्नलोऽयं पथि विबुधवरान् दृष्टवान् प्रेषितस्तै-
र्भैमीपार्श्वं सकामैर्नलनृपतिमृते नान्यमाकाङ्क्षतैषा ॥२॥

तत्रारब्धे तु भैमीपतिवरणविधौ शक्रवैवस्वताग्नि-
क्षीराधीशाः स्वरूपं दधुरथ नलवत् सा नमस्कृत्य देवान् ।
वव्रेऽभीष्टं पतिं तं नलमथ दमयन्ती प्रहृष्टाश्च देवाः
प्रत्येकं ते च दत्त्वा वरमपि च नलाय प्रयाताः स्वधाम ॥३॥

कृत्वोद्वाहं वरश्च स्वपुरि सपदि रोषात् कलेः पुष्करेण
द्यूते सोऽयं नलस्तत्क्षणममितबलो भ्रान्तचित्तो जितश्च ।

---

* This work is taken from the Ms. No. 21905 of this Institute. The unkown author has epitomized the story of Nala in 12 stanzas in the Sragdhara Metre. The last stanza contains a फलश्रुति that its recitation gives all पुरुषार्थ dispelling the sins of कलि.

त्यक्त्वा राज्यं धनं चाक्षयमपि च पणेनानुयातस्तु भैम्या
वासश्चैकं वसानो नगरपरिसरे सायमार्तश्चचार ॥४॥

दृष्ट्वा स्वर्णस्वरूपानयमथ विहगांस्तान् ग्रहीतुं प्रवृत्तः
सद्यस्तैरेव वेगादपहृतवसनोऽसौ सलज्जः स्थितश्च ।

भैमीवस्त्रार्धयुक्तस्त्वरितमथ सभां प्राप्य युक्तस्तयासौ
सुप्तायां तत्र तस्यां निरगमदसिना वाससोऽर्धं निकृत्य ॥५॥

रात्रौ भैमी प्रबुद्धा पतिगतिमनवेक्ष्याकुला यान्त्यथैनं
चान्विष्यारण्यदेशे त्वरितमजगरेणार्तरूपा गृहीता ।

सद्यः सा लुब्धकेन ग्रहणपरवशा मोचिता तं च शप्त्वा
कामार्तं तापसानां नुतिमपि समवाप्याटवीं सञ्चचार ॥६॥

पन्थानं प्राप्य पान्थैः सममथ विषयं चेदिराजस्य गत्वा
सैरन्ध्रीवेषगूढा न्यवसदसुखिता तस्य गेहेऽतिरम्ये ।

त्यक्त्वा भैमीं नलोऽयं गहनमथ समासाद्य दावाग्निमध्ये
क्रोशन्तं तं च कार्कोटकभुजगमरक्षत् स चैनं ददंश ॥७॥

वैवर्ण्यं ह्रस्वतां च स्ववपुषि समवेक्ष्याशु तेनैव दत्तं
वासोयुग्मं गृहीत्वा स नगरमृतुपर्णस्य राज्ञो विवेश ।

पाकान् कर्तुं तथाश्वानवितुमपि वसंस्तेन सोऽयं नियुक्त-
स्तत्राज्ञातो नलोऽयं तदनु च दमयन्तीवियोगेन खिन्नः ॥८॥

भीमोऽन्वेष्टुं नलं स्वां दुहितरमपि तां यान् न्ययुङ्क्त द्विजान् द्राक्
तेष्वेकः सञ्चरंस्तां द्रुतमथ भवने चेदिराजो ददर्श ।
तस्याज्ञां प्राप्य तस्मादयमपि दमयन्तीमनैषीद् विदर्भा-
नन्यः साकेतराष्ट्रे नलनृपमृतुपर्णान्तिकेऽस्तीत्यवोचत् ॥९॥

श्रुत्वा भर्तारमन्यं वरयितुमथ भैमीं तथा सम्प्रवृत्तां
शीघ्रं राजर्तुपर्णो नलयमितहयं यानमारुह्य गच्छन् ।
अक्षज्ञानाख्यमन्त्रं स्वयमपि स नलायाशु दत्त्वा प्रयातो
वैदर्भान् नैषधस्तत्क्षणमथ कलिमुक्तः प्रहृष्टो बभूव ॥१०॥

ज्ञातो भैम्या परीक्ष्य स्ववपुरपि दधन्नैषधोऽयं वसित्वा
वस्त्रं कार्कोटदत्तं ससुखमथ च तां रात्रिमस्मिन्नुषित्वा ।
अश्वज्ञानाख्यमन्त्रं सुहृदि तमृतुपर्णे निवेद्य प्रहृष्टो
वैदर्भं चानुमन्त्र्य स्वपुरमपि पुनः स्वल्पसैन्यो जगाम ॥११॥

प्रत्याहृत्य स्वराज्यं धनमपि विपुलं पुष्कराद् द्यूतहेतोः
सत्कृत्य स्वे च राज्ये तमपि च निवेश्यादरात् पूर्वशत्रुम् ।
आनाय्याथ स्वभार्यां सपदि च दमयन्तीं सपुत्रां विदर्भात्
प्रीतः सार्धं तयासौ न्यवसदमलधीर्नैषधो लब्धसौख्यः ॥१२॥

इत्थं नलस्य चरितं कलिकल्मषघ्नं
कल्याणदाय्यनुदिनं प्रयतः पठेद् यः ।
धर्मार्थकामसुतमित्रकलत्रसौख्यं
कीर्तिश्च मुक्तिरपि तस्य करस्थितैव ॥

तुलसीदललवनस्तवः*

विष्णोर्हर्षसमुद्भूते तुलस्यमरवन्दिते ।
नमस्करोमि त्वां भक्त्या मनोवाक्कायकर्मभिः ॥१॥
मनःप्रसादजननि सुखसौभाग्यवर्धिनि ।
आधि व्याधि च हर मे तुलसि त्वां नमाम्यहम् ॥२॥
श्रियं देहि यशो देहि कीर्तिमायुस्तथा सुखम् ।
बलं पुष्टिं तथा धर्मं तुलसि त्वं प्रयच्छ मे ॥३॥
मोक्षैकहेतो धरणीतटस्थे विष्णोः समस्तस्य गुरोः प्रिये ते ।
आराधनार्थं पुरुषोत्तमस्य लुनामि पत्रं तुलसि क्षमस्व ॥४॥

[इत्युक्त्वा तुलसीं नत्वा चित्वा दक्षिणपाणिना ।
पत्राण्येकैकशो न्यस्येत् सत्पात्रे मञ्जरीरपि ॥]

---

* This stotra is taken from the Ms No. 14998-c of this Institute. There is a well known practice among Hindus, especially among worshipers of Viṣṇu, of holding Tuḷasi the holy plant in veneration. In gathering the leaves of Tuḷasi some Mantras and stutis are mentioned in Purāṇas like Pādma, Skānda, Gāruḍa etc. This stotra seems to be summarised from Garuḍa Purāṇa.

NOTE

We have already published 10 critical editions of the "Prabandhas of Melputtūr Nārāyaṇabhaṭṭatiri". Now in this issue of the Sanskrit Journal we are publishing two Prabandhas viz. कौन्तेयाष्टक and अजामिलमोक्ष in the series "Prabandhas of Bhaṭṭatiri".

The manuscript materials used for preparing these works are listed below:—

I कौन्तेयाष्टकप्रबन्धः

1.	Ms. No.	3636	—	क
2.	..	5044	—	ख
3.	..	5156	—	ग
4.	T.	4893	—	घ
5.	Prabandharatnamālikā, Part I Printed in Malayalam script S. R. P. Press, Kayamkulam		—	ङ

II अजामिलमोक्षप्रबन्धः

1.	Ms. No.	3636	—	क
2.	..	16857	—	ख
3.	..	16942	—	ग
4.	T. M.	370	—	घ
5.	T. M.	374	—	ङ
6.	Prabandharatnamālikā, Part I Printed in Malayalam script S. R. P. Press, Kayamkulam		—	च

कौन्तेयाष्टकप्रबन्धः

(श्रीनारायणभट्टविरचितः)

कौन्तेयानवबुध्य सिध्यदशनोपायान् कुरूणां पतिः[1]
श्रीदुर्वाससमेकदा कुटिलधीरामन्त्र्य नागाह्वये ।
शिष्याणामयुतेन सार्धमधिकप्राज्यैः स भोज्यादिभिः
पूज्यं तं समबीभवत् स च मुनिस्तुष्टो वरं पृष्टवान् ॥१॥

धर्मात्मा ननु धर्मजः कुलपतिः सोऽस्माकमास्ते वने
तस्याप्येवमनुग्रहार्थमुटजं यायाः कुलश्रेयसे ।
एतावानधुना यतीश्वर वरः किन्त्वत्र खेदासहा
पाञ्चाली क्षुधया न सीदतु तया भुक्ते ततो गम्यताम् ॥२॥

[2]इत्थं पार्थिवकेतुनार्थित्तवरः शिष्यैः समेतो मुनि-
र्दिव्यज्ञानविलोकितद्रुपदजाभुक्तिः स मध्यन्दिने ।
अष्टाशीतिसहस्रतुष्टसुजनश्लिष्टान्तिकं धर्मजं
प्रापत् सोऽपि च तं ननाम मघवा साक्षादिव त्र्यीक्षणम् ॥३॥

अत्यौदार्यनिधिस्तु धर्मतनयः साध्वेव माध्यन्दिनं
कृत्वागन्तुममुं दिदेश महिषी भुक्तेत्यनालोचयन् ।
तावत् संभ्रमसङ्कुला सुमहतः शापानलाच्छङ्किता
कृष्णा हा बत दावरुद्धहरिणीदुःस्थामवस्थां दधौ ॥४॥

---

१. 'प्रभुः' क. छ.   २. 'एवं' ग.

तप्ता साथ पुनस्तमेव शरणं मत्वा जगन्नायकं
प्राग् दुःशासनदौष्ट्यदृष्टकरुणावेगं निजं दैवतम् ।
हा शौरे परिपालयेति चरणौ तस्यैव सेयं दृढं
ध्यायन्ती क्षणमात्रमास्त ददृशे तावत् त्रिधामा पुरः ॥५॥

प्रोक्तो वार्तां धृतार्त्या बत नृपसुतया क्षुध्यते लब्धमन्नं
मह्यं देहीति शंसन्नधिकविवशया प्रोक्तसर्वान्नहानिः ।
स्थालीलग्नं स शाकप्रति किल समुपा[1]नाय्य तद् विश्वमूर्ति-
र्भुक्त्वा तृप्तोऽ[2]स्मि सोऽहं सखि सपदि मुनीनाह्वयेत्यादिदेश ॥६॥

तावद् वेलागतास्ते नृवर शिशिरवार्णोगताः पूर्णपूर्णा-
स्तूर्णं तीर्णक्षुधोऽमी वयमयि जय जीवेति तोषोत्थघोषाः ।
योगीन्द्रा व्यर्थपाकोदयचकितधियः प्रद्रुतं विद्रुतास्ते
[3]वृष्णीशो विश्वसाक्षी नृपतिमपि भृशं प्रीणयित्वा तिरोभूत् ॥७॥

अतर्क्यतृप्तेः प्रविचिन्त्य हेतुं
[4]व्रजन् मुनिर्दिव्यदृशा [5]विदित्वा ।
ननाम कृष्णं प्रशशंस कृष्णां
नृपं च तं कौरव[6]मप्यनिन्दीत् ॥८॥

---

१. 'नीय तद्' ग. २. 'स्मि भद्रे सखि सा' ख. ३. 'कृष्णस्त्वाखरप्रकाशो नृपति' क. ङ. 'राजा विश्वे स्फूर्तविलसितमिति तत्र्यंथार्य द्रुतोऽभूत' ख. ४. 'मुनिर्भृशं दिव्यदृशा विलोक्य' ग. ५. 'निरीक्ष्य' ग. ६. 'निन्दत' ग.

अजामिलमोक्षप्रबन्धः

(नारायणभट्टविरचितः)

नारायणेति चतुरक्षरमेव पुंसां
कैवल्यमाकलयते[1] हि विधूय पापम्[2] ।
सङ्केतितं निजसुतेऽप्यवशो यदुक्त्वा
लेभे परां गतिमजामिलभूमिदेवः ॥१॥

अमानुषतपोबलो हरिपदाम्बुजे भक्तिमान्
यमादिपरिशीलनादिह नितान्तशान्तान्तरः ।
अजामिल इति श्रुतः सकलवेदशास्त्रार्थविद्
द्विजातिमकुटीमणिः समुदभूदभूतोपमः ॥२॥

वेदेषु प्रथितान् विधाय विधिवद् धर्मान् गृहस्थाश्रमी
नीत्वा कञ्चन कालमञ्चितरसं[3] शुश्रूषमाणो गुरून् ।
एकस्मिन् दिवसे स्वतातवचसा कर्मोचितानादरा-
दानेतुं स समित्कुशान् वनमुदूढोत्साहमाढौकत ॥३॥

स खलु तत्र विचित्रतर[4]द्रुमलतानिकरनिरन्तरे मधुकरझङ्कारमुखरितदिगन्तरे वनाभ्यन्तरे स्वल्पमपि निमित्तमुद्दिश्य कमपि हितमनल्पं जल्पता

१. 'तेऽतिविधू' ग. ब. ङ. २. 'पापान्' ग. ब. ङ. ३. 'तमुखं सु' ग. ब. ङ. ४. 'रतरुल' ग. ब. ङ.

विनिस्रस्तं वस्त्रमपि निस्त्रपमगणयता अनुचितबहुतरघोषमकारणमेव[1] हसता प्रस्खलितस्वरमुद्गायता[2] अन्तरान्तरा प्रियाहृदयावर्जनाय मन्थरतरमिवालपता लीलायामधिकलोलेन[3] केनापि हालापिबेन[4] हेलया दृढतरमालिङ्ग्यमानां[5] परिशिथिलविलोलकुन्तलां[6] मदविघूर्णितविलोचनमन्थरां[7] मृदुकलितगानबन्धुरां[8] विगलितनीवीबन्धनां गतिविलासविजितसिन्धुरामवलोकनविवशीकृतयुवलोकहृदन्तरां[9] प्रियतमसपीति[10]समुपजातसुधामाधुर्यमधुमद[11]द्विगुणितमदनवेगसमुदञ्चित[12]-घर्मकणाङ्कित[13]रोमाञ्चकञ्चुकितसकलावयवाममुद्रानुराग[14]समुद्रमग्नाम् अभद्रास्पदभूतां कामपि शूद्रां समद्राक्षीत् ॥

सदाचारासक्तः सततमपि धर्मैकनिरतः

प्रकृत्या निर्दोषः प्रचुरतरधैर्योऽपि तरसा[15] ।

स तां दृष्ट्वैवारात्[16] स्मरकृतपरीताप[17]विषमा-

मवस्थामापेदे कमिह भुवि कामो न लघयेत् ॥४॥

---

१. 'आरचि' ग. घ. ङ. २. 'प्रस्वरमु' ग. घ. ङ. ३. 'न लीलायमानाङ्गेन केनापि' ग. घ. ङ. ४. 'न दृढ' ग, घ. ङ. ५. 'ढमा' क. ख. ६. 'लकुन्तलभरां मद' ग. घ. ङ. ७. 'तविलोचनां मदकलित' ग. घ. ङ. ८. 'रां निवशी' ग. घ. ङ. ९. 'वजनहृ' ग. घ. ङ. १०. 'प्रेयोजनसपी' ग. घ. ङ ११. 'धुर्यं मधु' ग. घ. ङ. १२. 'गुणीकृतम' ग. घ. ङ. १३. 'णाञ्चित' ग. घ. ङ. १४. 'प्रमधिराग' क. ख. १५. 'सहसा' ग. घ. १६. 'रशरप' ग. घ. ङ. १७. 'रीपाकवि' ग. घ. ङ.

चित्तं तस्यां प्रसक्तं वशयितुमखिलैरेष यत्नैरशक्तः

स्मृत्वा तामेव भूयः समजनि विरतः स्वस्य धर्माद् द्विजन्मा ।

[1]द्रव्यैश्चान्यायलब्धैरपि धननिवहैस्तोषयित्वा निवासं

चक्रे तस्याः [2]समीपे विहरणरसिकः सन्ततं मन्मथान्धः ॥५॥

साध्वीं भार्यां स्वतातं प्रवयसमनुपे[3]तावलम्बां तथाम्बां

त्यक्त्वा तत्प्रीतिहेतोरनुचितमपि चौर्यादिकं कर्म कृत्वा ।

लब्धैरर्थैरजस्रं प्रणयविवशधीस्तत्कुटुम्बं प्रपुष्णन्

निर्लज्जोऽसावनैषीद् बहुसमयमहो! स्त्रीपिशाची मतिघ्नी ॥६॥

तस्यामासन्नथ दश सुता भूसुरस्यास्य दैवा-

दन्त्यस्तेषामगमदभिधां हन्त नारायणेति ।

पूर्वादृष्टैरिह किमु तदीयैर्मुकुन्दस्य यद्वा

नाम्नामेवं [4]प्रथयितुमिदं दुष्कृतेर्निष्कृतित्वम् ॥७॥

तदनु स दशमित्वं प्राप्य नारायणाख्ये

रतिमकुरुत तस्मिन् बालके केलिलोले ।

अविरतमपि पश्यन्नस्य लीलाविशेषा-

नयमहह जडात्मा[5] *प्राप मोहं नितान्तम् ॥८॥

---

१. 'द्रव्याय' ग. घ. ङ. २. 'सकाशे' ग. घ. ङ. ३. 'स्वामथा' ग. घ. ङ.
४. 'कथ' ङ ५. 'रमा मोहसिन्धु' 'जगाहे' ग. घ. ङ.

---

* 'रमा मोहसिन्धुं जगाहे' इति पाठान्तरमपि कखपाठयोर्लिखितं दृश्यते ।

* अष्टाशीत्यब्दसङ्ख्यायुः कष्टं तत्पुत्रलालकः ।
मुमुदे सोऽपि धिक् स्त्रैणो वेत्ति नासन्नमन्तकम् ॥९॥

†ततश्चान्त्यकाले सम्प्राप्ते सोऽपि दुस्सहामर्षातिभीषणात्यन्तरक्तीकृताम्बरीषसदृक्षेक्षणोदित्वराशुशुक्षणिस्फुलिङ्गविशङ्कितपुरोभागान् अतिपरुषताम्रोर्ध्वप्रसारितनिशिततरशिरोरुहशकलितजीमूतजालान् चण्डतरभुजदण्डमण्डितमहत्तमदण्डोद्भ्रमणनिपुणान् अतिनिष्ठुराट्टहासाटोपस्फुटदृश्यमानारालविकटदंष्ट्राकरालान् अन्तरान्तरा समुदीर्यमाणात्मकृतदुष्कृतव्रातान् असितवर्णानतिभयङ्करान् अन्तककिङ्करानन्तिके समालोक्य निर्भरभयावेशविवशीभूताशयः पुरा किञ्चिदच्युतस्मृतिवासनाबलात् क्रीडालोलुपं बालकमुद्दिश्य निजगलार्पितपाशापकर्षणनिरुद्धश्वासं विच्छिन्नाक्षरं नारायणेत्यभाणीत् ॥

इत्थं[1] व्यर्थीकृतप्रायकनिजजननो नेतुमात्मानमारा-
दायातान् वीक्ष्य लोकत्रितयभयकरान् प्रेतराजस्य दूतान् ।
पूर्वस्या वासनाया बलत इह कृतानेकपापोऽपि भूय-
[2]श्चोच्चैर्नारायणेति स्वसुतमथ भयादाजुहावाकुलात्मा ॥१०॥

तावदेव[3] देवदेवनामकीर्तनमेवंविधामवस्थां गतस्य तस्य मुखतः समुपाकर्ण्य[4] परिकलित[5]पालनीयता[6]धियो महनीयतर[7]सुषमाभर[8]रमणीयविलोकनाः

1. 'कृतायुः स तु मृतिसमये ने' ग. घ. ङ. 2. 'स्ताच्चै' ङ. 3. 'वंविधनाम' ग. ङ. 4. 'मनाक' ग. घ. 5. 'कलित' ग. घ. ङ. 6. 'लनाधि' ग. घ. 7. 'महितसुष' ग. घ. ङ. 8. 'रमरमणो' ग. घ. ङ.

* पद्यमिदं ग.घ.ङ.पाठेषु नास्ति'

† गद्यमिदं ग.घ.ङ.पाठेषु नास्ति.

करचतुष्कनिष्कलितगदाशङ्खचक्रपङ्कजाः[1] महामेरव इव नितम्बसमुल्लसित-[2]
चामीकरद्युतिपीताम्बराः, सत्काव्यसन्दर्भा इव महितगुणालङ्कारपरिभासुराः,
वारयोषाजना इव मनोहराङ्गरागाः, रविकरौघा इव दोषावसानदृश्यमानाः
मा भैषीरिति जलदघोषगम्भीरया[3] गिरा करुणातरङ्गितैरपाङ्गपातैरपि[4] तमतीव[5]
परिहर्षयन्तः परमपुरुषपारिषदास्त्वरिततरमभिपेतुः* । अनन्तरमन्तककिङ्क-
रानपि तमधिगलं सम्पाश्य सम्प्रवृद्धामर्षमाकर्षतः समुपेत्य 'मैवं कुरुध्वम्
अविलम्बमेवामुं विमुञ्चते'ति वदन्तः सत्वरमशरणैकबन्धवस्ते निरुन्धते स्म ॥

अथ रुद्धा हरिदूतैर्यमभृत्याः कलितविस्मयास्तरसा ।
विरलेतरबहुमति[6] तानेवमवोचन् गभीरया वाचा ॥११॥

के वा यूयं[7] नु देवा यदि पुनरुपदेवाः किमन्ये महान्तो
वेषाकारप्रकारः कथयति भवतां[8] भव्यतां दिव्यरूपाम् ।

---

१. 'रकलितशङ्खचक्रगदापङ्केरुहाः महा' ग. घ. ङ. २. 'च समुल्ल' ग. घ. ङ. ३. 'गभीर' ग. घ. ङ. ४. 'ङ्गैरपि' ग. घ. ङ. ५. 'च हर्ष' ग. घ. ङ. ६. 'मानादेवमवो' ग. घ. ङ. ७. 'किमु पु' ङ. ८. 'भवतां च' ग. घ. ङ.

---

* तुः । तावदेव चतुरः पुरोभुवि चतुर्भुजानुरूपामृत-
स्यन्दिमञ्जुतरमन्दहासशिशिरीकृताखिलदिगन्तरान् ।
मीनकुण्डलकिरीटहारवनमाल्यपीतवसनोज्ज्वलान्
नीलनीरदविलोभनीयसुषमान् ददर्श हरिपार्षदान् ॥
किङ्करांस्ततस्तांस्ते संपाश्याजामिलं गले ।
विमुञ्चतेति रुरुधुस्तरसा विष्णुपार्षदाः ॥
'अथ रुद्धा' ग. ङ.

प्राणानेतस्य नानाविधदुरितवतो यातनां नेतुकामा-

नस्मान् कस्मादिदानीमरुधत च विभोर्धर्मराजस्य भृत्यान्[१] ।।१२।।

वैवस्वतस्य भृत्यानामेवं वाचं निशम्य ते ।

इत्थमूचुर्हरेर्दूता मुग्धस्मेरमुखाम्बुजाः ।।१३।।

पृच्छामः साधु युष्मानिदमखिलविदो धर्मराजस्य दूतान्

कीदृग्धर्मस्वरूपं कथयत विषयः कोऽपि[२] दण्डस्य लोके ।

सर्वे किन्न्वत्र[३] दण्ड्या जगति[४] पुनरमी किन्नु[५] धर्मैकनिष्ठा

यद्वा किं ते नु सम्यग् दुरितमहरहो ये वितन्वन्ति कर्म[६] ।।१४।।

अथ[७] तेऽपि यमदूता यथाश्रुतं प्रत्यवदन्-

आम्नायैर्विहितो[८] हि यः स भुवने धर्मो निषिद्धोऽपरो

वेदास्तेऽपि जगत्त्रयीमयतनुर्देवः स नारायणः ।

तस्मिन् धर्मपथे[९] चरन्नविषयो दण्डस्य पुण्यप्रदे

योऽन्यस्मिन्निरतः[१०] स एव तु बुधैर्दण्ड्योऽत्र[११] निर्णीयते ।।१५।।

---

१. 'त्यान्' इत्यतः परं 'धर्मराजस्य दूतान्' इत्यन्तोंऽशः ख. पाठे भ्रष्टः । 'दूतान्' ग. घ. ङ. २. 'कोऽपि' ख.: 'कोऽस्य द' ग. घ. ङ. ३. 'न्न्वस्य द' ग. घ. ङ. ४. 'जगदपरे किं' ग. घ. ङ. ५. 'किन्न्वधर्मै' क. ख. ६. 'न्वन्त्यधर्मम्' ग. घ. ङ. ७. 'ते यथा' ग. घ. ङ. ८. 'योऽयमत्र भु' ग. घ. ङ. ९. 'पथे द' क. ख. १०. 'तः पुमान् स तु' ग. घ. ङ. ११. 'यताम्' ग. घ. ङ.

अयं[1] हि पितरौ त्यज स्वगृहिणीं च साध्वीं पुना
रमस्व कुलटायुतो विरम धर्मत: स्वीयत: ।
प्रपोषय कुटुम्बकं परधनं मुषाणान्वहं
विनिन्द्यमिति नाकरोत् किमिव[2] कर्म कामातुर:* ॥१६॥

इत्थममुं पापकृतं शुद्धया रहितं च निष्कृताकरणात् ।
यमनिकटं नेष्यामः शुध्यति दण्डैरसौ तत्र ॥१७॥

ऊचुस्ते हरिपार्षदा गिरमिमामाकर्ण्य वैवस्वत-
प्रेष्याणामहह स्पृशत्यपि सभां याम्यामधर्म: क्रमात् ।

---

१. 'अयं स्वपि' ग. घ., 'अयं च पि' ङ.   २. 'किमिह' ङ.

---

* एतदनन्तरं गघङपाठेषु एवं दृश्यते—

"पुनरपि हरिदूता याम्यदूतानवोचन्
जननशतसहस्रे दुष्कृतौघे कृतेऽपि ।
यदिह सकृदनेन व्याहृतं नाम विष्णो-
र्विदितमहह किं नो निष्कृतिस्तत्कृता वः ॥
नृणामघं दहति नाम हरेरबुद्ध्या-
प्याख्यातमामयमिवौषधमग्निरेधः ।
आम्नायकृत्यमखिलं शमलं पुनाति
सेवा हरेस्तु सह वासनया लुनाति ॥
इत्थं तद्वचनं गभीरमधुरं धर्म्यं निशम्याकुला-
स्ते वैवस्वतकिङ्कराः सरभसं जग्मुः स्वताताान्तिकम् ।
श्रीनारायणपार्षदेषु च गतेष्वम्भोजनेत्रामृत-
स्वान्तः सोऽपि तपश्चरन्निह पुनश्चागात स्वरूपं हरेः ॥"

इति गघङपाठेषु प्रबन्धोऽयं समाप्तः ।

अङ्के यस्य शिरो निधाय निखिलो लोकोऽपि शेते सुखं
तस्मिन् धर्मविपर्ययो यदि भवेत् का वा गतिर्देहिनाम् ॥१८॥

ज्ञातं किं न भवद्भिरेतदिह भोः श्राव्यं हि वेदोदितः
प्रायश्चित्तविधिः पुनाति दुरितं नो वासनां नाशयेत् ।
सेवा तस्य हरेर्जगत्त्रयपतेः कृन्तत्यपीमां द्वयी-
मेतस्यामपि नामकीर्तनमिदं धन्यं विनिर्णीयते ॥१९॥

अपि च,

श्रीनामोच्चरणं हरेर्विजयते लोकद्वये पूजितो
धर्मो जन्मलताप्रसूनकलिका कालाहिविद्रावणम् ।
बीजं मोक्षमहातरोरिह रुजां सिद्धौषधिः पाप्मनां
पञ्चानामपि निष्कृतं परमिदं दुष्कर्मसर्वङ्कषम् ॥२०॥

अबुद्ध्यापि हरेर्नाम कीर्तितं पापहृद् भवेत् ।
अग्निरज्ञानतः स्पृष्टः किमङ्गं न दहत्यसौ ॥२१॥

तत्तादृक् खलु नाम विश्वमहितं नारायणेति स्वयं
योऽसावीरयति स्म सम्यगधुना नाकर्णि भोः किन्त्विदं ।
प्रायश्चित्तविधिः कुतोऽद्य समभूत् तस्मादनेनाञ्जसा
पापानामिह विद्यते ननु कथं वा दण्डनं पण्डिताः ॥२२॥

किमिह कथितैः स्फीतैरेतैर्वृथा शतजन्मभि-
र्विहितदुरितौघानामेषा कृता ननु निष्कृतिः ।

अकृत सपदि त्रासाद्योऽसौ हरेः परिकीर्तनं
सुचरितवतामग्रे गण्यः कथं स हि दण्ड्यते ॥२३॥

जायते यदि सन्देहो विषयेऽस्मिन् भवादृशाम् ।
प्रष्टव्यो भवतां स्वामी धर्मसाक्षी स्वयं यमः ॥२४॥

बन्धनहेतुं पाशं शिथिलीकृत्याथ मोक्षयित्वा ते ।
अमुमिह सुसुखं चक्रुः स्वामिगुणो दृश्यते हि भृत्येषु ॥२५॥

श्रुत्वा वाचं तेषामित्थं
दृष्ट्वापूर्वं चैतद् वृत्तम् ।
गत्वा वेगादेते दूताः
कालायेदं सर्वं प्रोचुः ॥२६॥

ततश्च तस्मिन् कृतान्तपाशबन्धननिराकरणेन कृतार्थतामापाद्य बहुमानतुन्दिलमारचय्य वन्दनां विस्मयेन किमपि वक्तुकामे पश्चात्तापेन तुच्छेतरभक्तिभारमनुष्ठीयमानैरखिलजगदीश्वरस्य चरणोपासनैरदसीयस्यान्तःकरणशुद्धिमापादयितुम् अन्तर्धानमुपागता मुरारिपार्षदाः ।

अजामिलोऽपि तदीयमिथोवचनजनितनिजचरितस्मृतिः बहुविधदुष्कृतभाजनमकृतनिष्कृतमात्मानमधिकतरं विनिन्दन् मुहुरपि दुरन्तया चिन्तया सन्तपन् पुराकृतस्य हरिभजनलेशस्य फलमेवेदमिति विमलया धिया समाकलय्य पुनरपि निस्सारितदोषायै तत्सेवायै स्पृहयन्नखिलदुरितभङ्गकारिणि गङ्गातीरे प्रकृतिपावनं किमपि देवसदनमासाद्य मृदुपवनसमुपनीतवीचि-

जालविसृमरशीकरनिकरासेकशुचितरे क्वचिदपि प्रदेशे समुपविश्य यथाविधि सम्यगासनमाबध्य विषयेभ्य इन्द्रियाणि समाहृत्य मन आत्मनि संयोज्य आत्मानमपि गुणैर्वियोज्य अविरलविसरदानन्दसान्द्रेऽनुभवात्मनि परे ब्रह्मणि योजयामास ।

एवं गतेषु समयेष्वथ केषुचित् तं
विज्ञाय योगविधुताखिलकर्मबन्धम् ।
निश्शेषलोकमहनीयनिजानुभावाः
प्रादुर्बभूवुरथ ते हरिपार्षदेन्द्राः ॥२७॥

दृष्ट्वा तान् परिहृष्टधीः कृतनतिर्नानाविधानां निजं
पापानां करणं शरीरममरस्रोतस्विनीपाथसि ।
त्यक्त्वा तत्क्षणमेव देवनिकरैः पुष्पौघमावर्षति
श्लाघ्यं विश्वजनैर्हरेः पुनरसौ सारूप्यमभ्येयिवान् ॥२८॥

जीमूतश्यामलाभं विलसदरिगदाशङ्खपङ्केरुहाभि-
र्बाहाभिः शोभमानं कटितटविलसत्पीतचेलाभिरामम् ।
सारूप्यं तं दधानं भगवदनुचराः स्वामिनस्ते प्रमोदा-
दारोप्यैनं विमानं त्वरिततरमनैषुः सकाशं मुरारेः ॥२९॥

तदनु च,

धर्मात्मा धर्मराजः स खलु निजभटैः साधु विज्ञापितं तं
श्रुत्वा वृत्तान्तमस्य द्रुतमथ निखिलं वीक्ष्य भूयः स्वबुद्ध्या ।

माहात्म्यं विष्णुनाम्नामिदमनुकलयन् भक्तिपूर्णस्तदानीं
रुद्धाभानन्दबाष्पैर्गिरमवददिमां शृण्वतां कर्णमाध्वीम् ॥३०॥

हे भृत्याः संशृणुध्वं विधिहरपुरुहूतादयो वा न शक्ता
माहात्म्यं यस्य बोद्धुं भवत इह यतो भुक्तिमुक्ती जनानाम् ।
धर्मो येन प्रणीतः सकलशिवकरः शासिता शासकानां
योऽसौ विश्वैकसाक्षी जयति स जगतीमूलकन्दो मुकुन्दः ॥३१॥

तस्यास्मिन्ननुचारिणस्त्रिभुवने सारूप्यमुद्राङ्किताः
संरक्षन्ति तदीयभक्तिमकरन्दासञ्जनात् सज्जनान् ।
येभ्योऽहं च विशङ्कितोऽस्मि सततं तत्तादृशेष्वप्यसौ
दण्डस्तेषु विधीयते ह ह ह चेज्जायेत दण्डचो हि सः ॥३२॥

एतत् पश्यत निष्कृतेषु महितं तन्नामसङ्कीर्तनं
प्राप्तो येन स पापवानपि पुनर्योगीन्द्रगम्यां गतिम् ।
औचित्यात् करिणं विहाय स गवा भारो यथा हार्यते
प्रायश्चित्तविधिस्तथा निगदितश्चान्द्रायणादिः श्रुतौ ॥३३॥

उक्तैरिह किं बहुभिः संक्षिप्य ग्राह्यमेव कथयामि ।
स्वप्नेऽपि विष्णुभक्ता दण्डं नार्हन्त्यमी पुनर्वन्द्याः ॥३४॥

ततश्च तत्समयविनिस्सृतमुरारिनामाक्षरनिराकृतनिखिलकल्मषस्यापि तस्य दण्डयतां परिकल्पयतां निजपरिजनानामघं प्रशिशमयिषुरन्तरा तमेव भगवन्तमिमां भारतीमीरयामास—

अमीभिर्मद्भृत्यैरहह जडताग्रस्तमतिभि-
जने तस्मिन्नेनः सपदि विहितं यद् विधिबलात् ।
इदं निश्शेषं तत् खलु निखिलसाक्षी स सहतां
जगन्नाथस्तस्मै नम इह परस्मै भगवते ॥३५॥

वचनमखिलमेतत् स्वामिनो माननीयं
निजहृदि कलयन्तो दर्शितैकान्तधर्मम् ।
मुरहरचरणाम्भोजन्मसेवापरेषु
स्थिरतरबहुमाना याम्यभृत्या बभूवुः ॥३६॥

कृत्वा शङ्कासमेतानिति स यमभटान् विष्णुभक्तेऽजस्रं
माहात्म्यं तस्य नाम्नामपि निजचरितैर्बोधयन् देहभाजाम् ।
आनन्दानां निधानं मुनिजनसुलभं स्थानमावृत्तिहीनं
विप्रोऽसौ भूरिपुण्यस्त्रिजगति महितं प्राप्य देदीप्यते स्म ॥३७॥

अजामिलमोक्षप्रबन्धः
समाप्तः

NOTE

The Kriyākrama or Āśvalāyanakriyākrama of Melputtūr Bhaṭṭatiri is a metrical composition. It deals with the domestic rituals of Kerala Brahmins belonging to the Āśvalāyana branch of Ṛgvedins. Remembrance of the stanzas of this work will be very useful to performers of domestic rituals like अग्निमुख, नान्दीमुख, उपनयन etc.

The following Mss. materials of this Institute have been used for this edition.

1) Ms. 12417 — क
2) .. 5611 — ख
3) .. L 1383-B — ग

क्रियाक्रमः

(श्रीनारायणभट्टविरचितः ।)

बध्नीमश्चित्तबन्धं कळभवरमुखं धाम पाटीरवाटी-
क्षेत्रे वास्तव्यमेतत् त्रिभुवनजननत्राणसंहारदक्षम् ।
शश्वन्निःश्रेयसाय स्मृतनिजचरणाम्भोजनिःशेषलोक-
श्रेयस्याः कल्पवृक्षं प्रकटितकरुणाकन्दळश्रीकटाक्षम्* ॥१॥

चतुर्दोष्णे कोष्णस्तनभररमालिङ्गनसुख-
प्रहृष्यद्रोम्णेऽस्मै त्रिभुवनपरित्राणपटुने ।
पटीरारामेऽमुं जनमनुजिघृक्ष्यैव वसते
नमस्कुर्वे धाम्ने विसृमरमह कौस्तुभयुजे ॥२॥

कस्मैचिद्विश्वसर्गस्थितिविलयपरिक्रीडनोद्यन्महिम्ने
श्रीनावाक्षेत्रधाम्ने महितनवयतीन्द्राचर्यमानाय धाम्ने ।
कुर्वे गोविन्दनाम्ने[१] गळधृतवनमालाख्यदाम्ने नमोऽस्मै
ध्वस्तामित्राधिभूम्ने प्रणतसुरशिरोरत्नदीप्ताङ्घ्रिसीम्ने[२] ॥३॥

---

१. 'भृ' ख. २. 'पाङ्घ्रि' क.

---

* इतोऽनन्तरं गपाठे 'प्रणम्य श्री—' श्लो० ४. एवास्ति.

प्रणम्य श्रीगुरून् भक्त्या शौनकं चाश्वलायनम् ।

तत्प्रोक्तगृह्यकर्माणि श्लोकै[1]र्वक्ष्यामि कानिचित् ॥४॥

मीमांसानिश्चितार्थस्मृतितदनुगताचारसाङ्गश्रुतिः स-

त्वग्न्युत्पत्त्यादिका[2]ङ्गान्यपि तदवयवान् निष्कृतीनां विधींश्च ।

स्वानुष्ठेयस्य कल्पं प्रतिमनु च [3]ऋषिं देवतां ब्राह्मणं च

छन्दोर्थं चावधार्य स्वरमपि विधिनैवाक्षरोच्चारणं च ॥५॥

पूर्वेद्युर्ब्रह्मचारी सकृदहनि हविष्याज्यसिक्तेष्टमन्नं

लघ्वश्नन् वर्ज्यवर्जी दधदहतपटं शोषितं चोत्तरीयम् ।

नत्वा स्वाभीष्टदैवं गुरुमपि जननीमभ्यनुज्ञात आर्यै-

र्नित्यं नैमित्तिकं वा प्रतिदिनविहितं कर्म कृत्वारभेत ॥६॥

आ[4]चामेत् प्राक् क्रियार्थं क्षुतमुखजनने श्वादिदृष्टौ च वेगे

मूत्रादेश्चेत् तदुत्सर्जनमपि कुरुतां प्राङ्मुखस्त्वासने स्वे ।

वामं जानून्नमय्य प्रपदमपि भुवि न्यस्य जान्वन्यदीयं

भूमौ विन्यस्य चास्तां पितृविधिषु पदे वैपरित्येन कृत्वा ॥७॥

प्राचीनावीत्यधीतिप्रभृतिषु तु कृतोपस्थ आसीत दर्भे

देवादौ तूपवीती रतिमुखनृविधौ वा निवीती पवित्री ।

---

१. 'कैस्संगृह्यते स्फुटम्' क. २. 'चाङ्गा' ख. ३. 'ऋषीन्दे' क. ४. 'चम्य प्रा' क.

जान्वन्तर्न्यस्त[1]बाहुर्निजहृदि विदधद्दानहोमेषु वामं
विश्लिष्टाङ्गुल्यशाली शुचिजनमथवा साधुशब्दैर्ब्रुवाणः ॥८॥

रक्षोरुद्राभिचारासुरपितृनिर्ऋतीनां मनूक्ति क्रियां वा
विस्रंसोत्तानलेखाखननिरसनच्छेदभेदांश्च कृत्वा ।

स्पृष्ट्वा खं नाभ्यधोङ्गं परिवृ[2]तवसनं चेह संस्पृश्य तोयं
प्रायश्चित्तस्य चेत् स्याद्विषय इदमपि स्वस्वकालेषु कृत्वा ॥९॥

[3]श्रद्धास्तिक्यावधानस्वगुरुबहुमतिस्नेहविश्वासशाली
शुद्धैर्द्रव्यैर्विशुद्धज्वलनसमयदेशेषु कर्माणि कुर्यात् ।

कर्तारं दक्षिणस्थः स्पृशतु सनियमश्चेतरः संस्क्रियादौ
पूर्वेद्युर्ब्रह्मचर्यं तदहनि च [4]चरेच्छ्राद्धकर्ता च भोक्ता* ॥१०॥

इत्येवमुद्दिष्टमशेषक[5]र्म-
साधारणं किञ्चन धर्मजातम् ।

वदा[6]म्यथो वह्निमुखं पुरस्कृ-
त्याशेषगृह्यो[7]क्तविधिं क्रमेण ॥११॥

---

१. 'स्य बाहु' ग. २. 'हित' ख. ग. ३. 'श्राद्ध.' ग. ४. 'परे श्रा' क. ग.
५. 'र्मणा' ग. ६. 'म्यहो' ग. ७. 'मन्त्रोक्त' ग.

---

* इतोऽनन्तरं खपाठे 'पुण्याहान्त' इत्यन्तो भागो नास्ति ।

उल्लिख्याधाय वह्निं करकलितसमिद् देवताः प्रोच्य चान्वा-

दध्याद्[1] बद्धे कुशेध्मे अपि पुनरुपलिम्पेत्समूहेत च त्रिः ।

दर्भैर्भूयः परिस्तीर्य च विरचितपर्युक्षणो[2] वा स्तरित्वा

दर्भान् कृत्वा पवित्रं प्रणयतु च हविर्निर्वपेत् तत्समुक्षेत् ॥१२॥

[3]पक्त्वा संस्कृत्य सर्पिः सहचरु तदथोत्पूत[4]मभ्यर्च्य दर्भे

कृत्वा स्रुङ्मार्जनोपस्तृतहविरवरोपाभिघारा[5]वसानान् ।

अप्यादध्यात् परिध्यर्पणमुभयसमित्क्षेपमग्न्यादिपूजां

चेध्माघाराज्यभागानथ चरतु यथास्वं प्रधानाहुतीश्च ॥१३॥

हुत्वा स्विष्टकृते सधर्मि[6] दहनेऽस्येन्मेक्षणं स्रुक्चरू

उत्सृज्यास्यतु[7] चानुयाजपरिधीन् पात्रं चरेन्निष्कृ[8]तिम् ।

संस्राव्याप्यथ पूर्णपात्रनिनयं कृत्वा समूह्यानलं

त्रिः पर्युक्ष्य तथार्चयेद्वसितधृग्विघ्नेशमुद्वासयेत् ॥१४॥

इत्यग्निमुखम्[*] ।

विघ्नेशार्चननिष्कृती स्थलविशुद्ध्यन्ते हविस्स्रुङ्मुख

शङ्खं रूप्यमयं त्रिपात्रमपि तत्रासाद्य कुर्वीत् क्षणम् ।

---

१. 'ध्वा' ग. २. 'णापाम्त' ग. ३. 'वावत्वा' क. ४. 'तम' ग.
५. 'ोपसादान्' ग. ६. 'धर्म' क. ७. 'त चा' क. ८. 'ती' क.

---

* वाक्यमिदं क पाठे नास्ति.

पच्छौचासनदर्भदानचतुर[1]र्घ्योत्पत्तिदानवार्यौ-

संयोगानपि चन्दना[2]दि वित[3]रेद्देवद्विजान्नं क्षिपेत् ।।१५।।

कुर्यात् पैतृकपाणिहोममुभयौ वर्गौ पृथग् भोजये-

न्मध्विवत्यादि जपेच्च पृच्छतु पृथग्बल्यन्नमप्युद्धरेत् ।

शिष्टे प्राप्य(?)बलिं हरेद् द्विजनुषोऽथाचामयेद्दक्षिणां

दत्त्वार्घ्यं विवृणोतु कव्यमुखमुत्सृज्याथ चोत्थाप्य तान् ।।१६।।

दत्त्वैभ्योऽक्षतमर्घ्यमार्भिकरकोत्सर्गौ विधाय द्विजान्

नत्वा प्रार्थ्य सहाशिषः पितृमुखान्यातोऽभिवाद्यान्वियात् ।

ये नान्दीमुखसंज्ञका पितृगणास्तत्तृप्तये कर्मणः

प्राङ् नान्दीमुखकर्म कार्यमिति तच्चादावितीहोदितम् ।।१७।।

* നാന്ദീമുഖമൂട്ടക— (नान्दीमुखश्राद्धम्।)

विघ्नेशार्चनकृत् पवित्रमुखदो विप्रेभ्य उत्तानितं

प्रोक्ष्यापूर्य च पात्रमत्र निदधत् स्वर्णं[4] च दत्त्वार्चयेत् ।

आत्मार्चां विदधत् पवित्रमुखदः शुद्धार्थिनेऽभ्युत्थि[5]तो

दर्भादीन् धृतवान् प्रवाचयतु तान् प्रोक्ष्याक्षतांश्चोत्किरेत् ।।१८।।

** पुण्याहम् ।

कल्याणाख्यमिवाद्य मङ्गलजपी साभ्युद्गतिः प्रस्थितः

कन्यासद्म तथा प्रविश्य च वृतः स्नात्वार्चितेभाननः ।

१. 'र्घ्यु' ग. २. 'नानि' क. ३. 'तरेदेव' ग. ४. 'र्णादि बध्नार्च' क. ५. 'ष्यु' ग.

* इदं वाक्यं कपाठे नास्ति। **इदं वाक्यं कपाठे नास्ति।

प्राङ् नो चेद्विदधीत निष्कृति[1]मथो नान्दीमुखं योषितः
पुण्याहे प्रकृते स्वयं च कुरुतां तत् स्वस्तिजप्यं गणम् ॥१९॥
गत्वाध्यास्य च पीठिकां वनितया नीराजितः पृष्ठतः
स्त्रीदाता त्वभिवादितो विहितपच्छौचोऽवरुह्य स्वयम् ।
आचम्योत्थितवान् नवाहतपटौ संस्पृश्य वध्वैतया
स्पृष्टं वस्त्रयुगं सकृद्युवसृचा प्रागुत्तरीयं दधत् ॥२०॥
आचम्य द्विरथोपविश्य भवने लिप्त्वा लिखेत् तत् स्थलं
प्रोक्षेद् दानमथो विधाय शकलं त्यक्त्वादधीतानलम् ।
अन्वा[2]धाय कृते परिस्तरणपर्यन्ते तु पर्युक्ष्य वा
[3]संसाद्य प्रणयेत् सलाजकघृतं संस्कृत्य दर्भेऽपयेत् ॥२१।
आज्यं प्राक् स्रुवमार्जने तु विहिते लाजं च लम्बोदरं
स्वं चाभ्यर्च्य सदानभूषितवधूवक्त्रं च दर्वेक्षताम् ।
[4]स्रग्धर्तोदकपूर्वकर्मणि कृते वध्वान्तरायातया-
न्वारब्ध परिधिक्रियादि हवनं कृत्वाथ दत्वा करम् ॥२२॥
गृह्णीयादथ लाजहोम परिणीत्यश्मानमेत् त्रिः क[5]रे
कृत्वा पावकदक्षिणाखिलहुतिः स्त्रीसप्तपादोत्क्रमान् ।

१. 'मुखं ना' ग. २. 'धानकृ' क. ३. 'कंसा' ग. ४. 'ग्दत्तोदक' ग., ५. 'कृते' ग.

मूर्धस्पृष्टयुदकुम्भयुक्षणवधूतारेक्षणावाग्विस-
गन्ते स्विस्टकृदादिशेषमवसायाग्निं समारोपयेत् ॥२३॥

* വേളി (—विवाहः।)

उद्धृत्योक्ष्य सह स्त्रियासित[1] इह क्षिप्तानलं[2] तां क्षिपे-
न्मन्त्राभ्यां समिधं कुशानपि पुनर्होमं द्वितीयं चरेत् ।
नान्दीं[3] सस्त्रि विधाय मन्त्ररहितं[4] वह्निं निधाय प्रजे-
शादि प्रोच्य कुशेध्मबन्धनमुखे संस्कृत्य सर्पिस्स्रुवौ ॥२४॥

नीत्वा योषितमन्तरेण वृषचर्मण्यासयित्वा परि-
ध्याधानादिकृदाज्यभागवसितौ दत्त्वा प्रधानं चरेत् ।
अङ्कत्वा स्वस्य च योषितो हृदवसाय स्विष्टकृत्पूर्वकं
होमं चर्मणि चोपविश्य नियमी बध्वा सहास्तां त्र्यहम् ॥२५॥

** രണ്ടാമോമം —(द्वितीयहोमः।)

नान्दीपूर्वमथोपलिप्य च समूह्य त्रिः परिस्तीर्णं[5]कृत्
त्रिः पर्युक्ष्य हविश्च पर्यनलयेदुद्वास्य तत् प्रार्थ[6]येत् ।
क्षिप्त्वैधो जुहुयाद् द्विशोऽथ च समूहाद्यं चरन् भस्मधृग्
विघ्नेशं च विसर्जयेत् प्रथमतो होमन्त्विहौपासने ॥२६॥

*** ഔപാസനവേളി—(औपासनम् ।)

१. 'यान्वित' ग. २. 'प्तानलान्तां' क. ३. 'सत्रि' ग. ४. 'तं चान्वा नि' ग
५. 'र्णि' ग. ६. 'र्च' ग.

* इदं वाक्यं कपाठे नास्ति। **इदं वाक्यं कपाठे नास्ति। *** इदं वाक्यं कपाठे नस्ति।

गृह्याग्नौ त्रिसमूहनं त्रिपरिषेकं चापि कृत्वा द्विधा
कृत्वान्नं समनक्तु पर्यनलयेदग्निं च विघ्नेश्वरम् ।
आत्मानं च समर्च्य दानकृदथो पर्युक्ष्य मन्त्रैः सकृ-
द्धुत्वा [1]विश्वबलिं हरेत विधिवन्मन्त्रैश्च पर्युक्षतु ॥२७॥

हुत्वा सूर्यमुखैस्ततश्च दशभिस्तैरद्भ्य इत्यादिभि-
स्तैरिन्द्रप्रमुखैश्च पूरुष[2]मुखैस्तोयादिदानादिकम् ।
रक्षोभ्यश्च पितृभ्य इत्यपि बलिं कृत्वाथ भूरादिभि-
र्हुत्वा च त्रिसमूहनादि कुरुतां श्वभ्योमुखैश्चान्ततः ॥२८॥

* वैश्वदेवम् ।

अथ दीक्षाचतुर्थेऽह्नि प्रातरौपासनाहुतिम् ।
दानं च कृत्वा धृत्वान्यौ पटौ स्नातां वधूवरौ ॥२९॥

कृत्वा नान्दीमुखान्तं परिणयपटधृक् प्रोक्ष्यपुण्याह[3]कौ तौ
कुर्याद्दानं च मौहूर्तिकमपि शयनं प्राप्य भूषेत् स्ववध्वौ ।
ऊर्वोरानीय वध्वा वसनमगरुणा लिप्यतां लिङ्गयोनी
सम्बध्याप्लुत्य पुण्याहकृदथ परिवेष्ट्या[4]नयाश्वाशयेत्ताम् ॥३०॥

** ശേഷം—(निषेकः ।)

---

१. 'द्विश्व ब' ग.   २. 'पुंलस्तो' ग.   ३. 'हतोयैः' ग.   ४. 'श्याश' ग.

---

* इदं वाक्यं कपाटे नास्ति ।   ** इदं वाक्यं कपाटे नास्ति ।

शान्तेऽनले भस्म निरस्य गोमये-
नासृज्य वह्निं निदधद्विलिप्य च ।
समूह्य पर्युक्ष्य सकृत् परिस्तृणन्
पर्युक्ष्य चासाद्य कुशेषु पञ्चकम् ॥३१॥

उत्तानिते प्रोक्षणपात्र उक्षिते
बद्ध्वा पवित्रं निदधज्जलं क्षिपेत् ।
उत्पूय चाप्याय्य समुक्ष्य च त्रि-[1]
रुत्तानितं शिष्टचतुष्कमुक्षतु ॥३२॥

संस्कार आज्यं त्रिरमन्त्र उत्पुना-
त्वनुद्धरन् प्रागथ मार्जयेत् स्रुवम् ।
आराध्य वह्निं परिषिच्य मन्त्रतः
कृत्वा समित्क्षेपमयस्रुवाहुतिम् ॥३३॥

संस्राव्य मन्त्रैः परिषिच्य चार्चये-
च्छान्तेषु पर्वादिषु[2] भस्ममन्त्रतः ।
सम्प्रोक्ष्य चोद्धूल्य विनैव तु स्थलं
बध्वा सहारोप्य विहाय भस्म तत् ॥३४॥

मृष्ट्वा स्थलं गोशकृताग्निमादधत्
समिध्य तस्मिन् समिधं च तां क्षिपन् ।

---

१. 'त्रिश उत्ता' ग.   २. 'पूर्वा' ग.

लिप्त्वा समूहादि पुरोवदाचर-
न्नयाश्वहोमादथ पञ्चहोतृकः ॥३५॥

दशात्मकेनापि तथा मनस्वती-
मन्त्रेण मिन्दामनुयुग्मकेन च ।
जुहोतु सर्वैरपि भूर्भुवादिभि-
र्दीक्षान्तरा तैश्च सतारकैस्त्रिभिः ॥३६॥

* തീയിടുക— (अग्न्याधानम् ।)

विघ्नेशार्चननिष्कृती इह चरेद् ब्रह्मोपवेशोद्धती
संभृत्य प्रदिशेद्विकीर्य विलिखेदोमग्निमुक्त्वा हरेत् ।
संभारान्[१]निदधीत चाग्निमुपलेपाद्यात्मपूजावधौ
पर्युक्षेन्मनुभिश्चतुर्ग्रहणकृत्तिष्ठन् स[२]मुक्षादिकृत् ॥३७॥

सप्ताद्येन विधाय पूर्णहवनं दद्यात् पशुं वेधसे
तन्त्वाद्यैस्तिसृभिश्चतुर्भिरपि चाभ्यावर्तिभिश्चाहुती ।
मिन्दाभ्यां जुहुयाच्च भूःप्रभृतिभिर्मन्त्रोक्षणान्तं चरन्
दत्त्वा कं च विसृज्य चार्च्य दहनं विघ्नेशमुद्वासयेत् ॥३८॥

** സംഭാരം കൂട്ടിത്തീയിടുക —(संभारेण अग्न्याधनम् ।)

---

१. 'रं नि' ग. २. 'मूहादि' ग.

---

* इदं वाक्यं कपाठे नास्ति । ** इदं वाक्यं कपाठे नास्ति ।

स्थालीपाकमथो नवाग्रहयणमप्यारभ्य नान्दीं चरेद्

दानं चाप्युभयोः प्रधानहवनात् पूर्वं विदध्यादिह ।

तूष्णीमेव निरुप्य हव्यविभजिर्मुक्त्वा[1] नवान्नैः पुन-

र्होमे स्विष्टकृतेऽवदानसमये भक्षार्थमप्युद्धरन् ।।३९।।

पत्न्या न्यस्य तथाभिघार्य विदधत्तत्स्विष्टकृद्धर्मिणा-

ऽऽदायान्नमथ[2] प्रजापतिजपी भक्षेच्च कुक्षिं जपेत् ।

होमान्ते कृतवैश्वदेवहवनो नैशं विधिं वर्जयन्

योषामाशयतां च शेषितहविर्जप्त्वं जपेच्चोदरम्[3] ।।४०।।

* आग्रयणम् ।

आरोप्यायतनेन पावकमयं मन्त्रेण कुण्डाद्बहि-

र्मध्ये विदध्यातु पश्चिमादि शकलेनैन्द्रीदिगन्तं क्रमात् ।

एवं दक्षिणतस्तिरुत्तरदिशि प्रोक्ष्यादधत्पावकं

चाजुह्वानमुखेन चान्यमनलं शेषं चरेदुक्तवत् ।।

अन्वाधानकृदुच्चरेदिह मनुं त्वमग्न्यादिवैश्वानरं

स्वन्तं निर्वपणे तथोक्षणविधौ ङेन्तं प्रधानाहुतौ ।।४१।।

** വൈശ്വാനരി—(वैश्वानरी ।)

---

१. 'जिम्मु' ग. २. 'याथ करेण ना गृहयतां भ' ग. ३. 'चाद' ग.

---

* इदं वाक्यं कपाठे नास्ति । ** इदं वाक्यं कपाठे नास्ति

स्नात्वा स्त्रीसहितः सम[1]ूह्य परिसंस्तीर्याग्नि दर्भैरग्निकैः

पर्युक्ष्याष्ट च सादयेत करकं प्रोत्तान्य चापूरयेत् ।

उत्तान्याखिलमोप्य तण्डुलमथो पक्त्वानलेति प्रणी-

ते कृत्वा परिषेचनावधि लिखन् स्फ्येनाग्नि दर्भांस्स्तृणन् । ४२॥

[2]कव्यध्रौवघृतं विधाय समुपस्तीर्योदगुद्वासितं

संसाद्याञ्जनपूर्वकं च कशिपौ दर्भे[3]ऽपि चाराधयेत् ।

आराध्यानुपवीर्जलादि च दिशन्नावाह्य पित्रादिकान्

स्थानेष्वम्बुमुखं दिशन् समुपवीयाराधयेत् पावकौ ॥४३॥

कुर्वीतानुपवीरथेध्महवनं होमद्वयं मेक्षण-

क्षेपं चाम्बु ददच्च पिण्डनिवृतौ लिप्त्वानुमन्त्रेदिमान् ।

प्राणायाम्यनुमन्त्र्य जक्षतु नमा दत्त्वाम्बु तैलाञ्जने

वासश्चापि जलादि चैषु ददताभग्रे च तोयादिकान ॥४४॥

आराध्योक्तवदुत्थितो भजनकृत्प्रोद्वास्य चान्त्रेत्य तान

वह्निं चानुभजन् द्वि[4]रर्थितसुतः पिण्डं वधू[5] प्राशयन् ।

पिण्डाद्युत्सृजतूपवीय दहनावाराध्य कुण्डीकुशा-

वुन्मुञ्चेदिति पिण्डपूर्वपितृयज्ञस्य क्रियाणां क्रमः ॥४५॥

* पिण्डपितृयज्ञः ।

---

१. 'मु' ग. २ 'कर्यध्रौ' ग. ३. 'धयन्' ग. ४. 'न्नथार्थि' ग. ५. 'येत' ग.

* इदं वाक्यं कपाटे नास्ति ।

स्नात्वाथ स्थलशुद्धिकृत्परिसमूहादीध्महोमावधौ

शङ्खाद्यासद[1]कृन्निमन्त्र्य कृतपच्छौचौ निवेद्य द्विजौ ।

बर्हिर्विष्टरद· सुरार्घ्यकृदथो पित्रार्घ्यपात्रात्रयं

सम्पूर्याप्यभिमन्त्र्य चार्चि[2]ततिलाद्यश्छादयित्वार्चतु ॥४६॥

वन्दित्वा दिवि चार्घ्यदः पितृमुखेष्वम्भो दिशन्नन्तरा

सन्दर्श्यार्घ्यमथोपवीय ददतां धारां च मन्त्रेत् पृथक् ।

सन्त्यज्यानुपवीर्दलान्यथ युनक्त्वर्घ्यं समुक्ष्यापिधा-

याराध्याथ ददातु चन्दनमुखं देवेऽर्पयेच्चौदनम् ॥४७॥

हुत्वान्यत्त्वनुमान्य शिष्टसहितं सम्भोजयन्नानमन्

मध्वित्यादि जपेच्च तृप्तिमनुपृच्छेत् पिण्डकृच्छिष्टवाक्[3] ।

पिण्डाधानमुखं तदष्टिचरमं कुर्याद्बलिं चाग्रतो-

ऽथाचान्ते कृतदक्षिणोऽर्घ्यविवृतावग्न्यर्चनान्तं चरेत् ॥४८॥

पित्राद्यौ विवदन्नुभौ समुपवीयोत्थापयेदक्षता-

न्दत्त्वार्घ्यं च विमृज्य मुक्तकरकोऽग्न्यदीन् परिक्रम्य च ।

नत्वा प्रार्थ्य कृताशिषोस्तु चरणौ संगृह्य चान्वेतु ता-

वित्थं पार्वणसंज्ञितेऽत्र कथितः श्राद्धे क्रियाणां क्रमः ॥४९॥

* पार्ववणश्राद्धविधिः ।

---

१. 'सदिक्' ग. २. 'ञ्ञा' ग. ३. 'वान्' क.

* इदं वाक्यं कपाठे नास्ति ।

१४

कुर्यात् पार्वणवन्निमन्त्राचरमं पूर्वेद्युरित्यादिना
पच्छौचादिकृदष्टमन्त्राहुतिकृच्चान्ताच्च पूर्वे दिने ।
स्थालीपाकविधिं परेद्यवि चरेन्मन्त्रोननिर्वापकं
हव्यस्यापि विभागमर्शरहितं सप्त प्रधानाहुती[1]. ॥५०॥

कुर्यात् पार्वणवच्च भोजनबली वह्निक्रिया वर्जय-
न्नन्वष्टक्य[2]विधिं तृतीयदिवसे स्त्रीपिण्डयुक्तं चरेत् ।
आर्द्रा मूलयुताः कुशा इह तथा[3] पर्यास्तृतिर्मुष्टिभि-
रसादे पञ्च तु भाजनानि सकृदाच्छिन्न[4]द्वयं चाधिकम् ॥५१॥

पक्तव्यं कृसरं च पायसमपि ग्राह्या यवागूः कुशै-
स्तीर्थावाहनपूर्वकं च विधिवत् कार्यं पृथग्विस्थले ।
उद्वासो दधिमन्थयुक्तहविषां सादे तु मध्वन्विते
[5]मन्थं चाञ्जनपूर्वकं च पृथगत्रासादयेद्योषिताम् ॥५२॥

होमौ द्विद्विरवत्तकव्यकचतुष्केणात्र पिण्डान् पुनः
कव्यैः षड्भिरपि प्रदाय वनितापिण्डे सुराचामकौ ।
दत्त्वा लेपनदोऽनुमन्त्रणमुखः[6] पिण्डाशनोनं चरे-
दान्तान् प्रोष्ठपदेऽपि चान्त्यदिनवत् कुर्यादिमामष्टकाम् ॥५३॥

---

१. 'तिम्' ग. २. 'न्वक्यष्ट' क. ३. 'था तु..द्विस्त्रिभिर्मु' क. ४. 'न्नं द्व' क.
५. 'मासं चा' ग. ६. 'खं' ग.

* अष्टका ।

पुण्याहान्त इह प्रजापत[1] इति प्रोच्याज्यभागादिमं
चान्वाधाय[2] निरुप्य[3] बर्हिषि हविस्संसाद्य नीत्वान्तरा ।
स्थालीपाकवदाज्यभागहवनान्ते दानकृत् स्त्रीकरे
दध्न्येकं यवमोप्य तत्र निदधन्माषौ च तत्पार्श्वयोः ।।५४।।

पृष्ट्वा किं पिबसीति पुंसवनमित्युच्चारयन् छादयन्
हस्ताभ्यां त्रिरथाशयेत् स्त्रियमिदं कुर्यात्त्रिरेवं दिशेत् ।
वृत्तच्छायगदारपृष्ठवसतिर्दूर्वाम्भसाते[4] मनू-
नुक्त्वा नस्यविधिं विधाय जुहुयाद्यत्ते हृदिस्पृग्जपेत् ।।५५।।

** पुंसवनम् ।

कार्या पुंसवत्त् क्रिया परिधितो न स्याच्चरुस्त्वासयन्[5]
कृत्तौ तां परिधिप्रभृत्यथ चरेद्धोमं प्रधानान्तिमम् ।
दत्त्वा सीमकृदानुबध्य च ददद् द्वाभ्यां पवित्रादिकं
प्रोक्षन्[6] गापयतां दिशेदपि चरेत् स्विष्टादिकर्मान्ततः ।।५६।।

*** सीमन्तम् ।

---

१. 'तिरिति' ग. २. 'त्वन्वा' ग. ३. 'रूप्य' ग. ४. 'सान्ते म' क.
५. 'नय' ग. ६. 'प्रेष्यन्' ग.

---

* इदं वाक्यं कपाठे नास्ति । ** इदं वाक्यं कपाठे नास्ति ।
*** इदं वाक्यं कपाठे नास्ति ।

दृष्ट्वा जातं तनूजं विहितसहपटस्नाननान्द्या[1]दिकर्मा

दानं कृत्वाङ्कसंस्थं शिशुकमशितयेद्धेममध्वाज्यविष्टम ।

श्रोत्रद्वन्द्वे सुवर्णं निदधदथ जपेदंसयुक्स्पृक् च सञ्ज-

व्याख्यामुच्चार्य गुह्यां शिरसि च समवघ्राय मृष्ट्वा जपेच्च । ५७॥

* ജാതകർമ്മം† —(जातकर्म ।)

विघ्नार्चाचित्तनान्द्याचमनमथ चरेच्चापि पुण्याहयुग्मं

द्वैतीयीकस्य मध्ये वितरणकटिसूत्रे त्रिपुण्ड्राणि कृत्वा ।

ओंपुण्याहावसाने विधिवदथ शिशोर्नाम कृत्वावशिष्टं

पुण्याहं नामयुक्तं विदधदथ समाप्याह्वयेद्ब्राषयादि ॥५८॥

(പേരിടക—नामकरणम् ।)

हेरम्बार्चननिष्कृती सहसुतो नान्दीमुखं चाचरेत्

पुण्याहं च करोत्वथो वितरणं मौहूर्तदानं तथा ।

धृत्वा छत्रमुखं समङ्गलजपो निष्क्रम्य बालं दधद्

वृक्षं त्रिश्च परीत्य तत्स्पृशममुं मङ्गल्यजप्यानयेत् ॥५९॥

** പുറപ്പാട്—(निष्क्रमणम् ।)

---

१. 'न्द्यन्तक' ग.

---

* इदं वाक्यं कपाठे नास्ति । ** इदं वाक्यं कपाठे नास्ति

† इतः परं गपाठे एवं दृश्यते—
'नान्द्यादिपुण्याहकृतौ नु सूत्रं प्रक्षिप्य पात्रे पुनरत्र सद्यः ।
पुण्याहकर्मापि च तत्र मन्ये कुर्वीत नामाथ समापयेत तत ॥

പേരിടക

कृत्वा नान्दीं च पुण्याहकं दानकृत, धृत्वा छत्रं श्लो० ५६. पा० ३.

विघ्नार्चादिकृदन्नदैवतयुतं पुण्याहकर्माचर-

न्नन्नप्रोक्षणकृद्दधच्च तनयं सम्भूष्य चालिम्पतु ।

मात्राऽन्न निहितेऽत्र रूप्यरचिते पात्रे द्विजान् भोजयन्

मध्वाद्यन्वितमाशयेदथ शिशुं मन्त्रेण तूष्णीमपि ॥६०॥

* ചോറൂണ്—(अन्नप्राशनम् ।)

पुण्याहान्तचतुष्ककृद्धुतवहाधानादि पर्युक्षणा-

न्ते व्रीह्यादिकसादकृद्विधिमुपावेश्य प्रणीयाज्यकम्[1] ।

सम्मृज्य स्रुवमन्तरागतशिशौ मात्राङ्कगे[2]ऽथाचर-

न्नाघारान्तमथ प्रधानहुतिकृत् संयोज्य वारिद्वयम् ॥६१॥

न्व्याज्यार्पणदानकृच्छिर इहोन्दन्[3] न्यस्य दर्भक्षुरौ

छित्वा मातृकरे क्षिपेच्छकृति[4] सा चैवं त्रिरेतच्चरेत्[5] ।

वामे चैवमृते तुरीयमखिलं कृत्वा घृताक्तं क्षुरं

दत्त्वा वप्तृकरे प्रशास्य विहितक्षौराप्लवे बालके ॥६२॥

कृत्वा स्विष्टकृदादिपाशहरणान्तं ब्रह्मणो निष्कृतौ

स्वन्त्वाचार्यधनं ददद्विधिमुखे मृष्ट्वा[6] प्रणीताजलम् ।

---

१. 'ज्यकृन्' ख. ग. २. 'त्राङ्क' ख. ३. 'दन्य' ग. ४. 'च मृदि सा' ख. ५. 'तुरीया च' क. ६. 'दृष्ट्वा' क., 'पृष्ट्वा' क.

---

* इदं वाक्यं कपाठे नास्ति ।

निष्क्रान्ते विधिवद्विधौ परिसमूहान्तं[१] च कर्माचरेत्

तूष्णीमग्निसमिन्धनान्वितमिदं चौळान्तकर्म स्त्रियाः[२] ।।६३।

* चौळम् ।

विघ्नेशार्चनपुण्याहदानमौहूर्तदक्षिणाः ।

कृत्वा पुंस्त्रीकर्णवेधः पुण्याहो न स[३]र्वर्णिनाम् ।।६४।।

** कर्णवेधः ।

नान्दीपुण्याहभूषाशनवपनकृतौ स्नानमग्नेर्निधानं

[४]चान्वाधानं स्रुवामृष्टचवधिकृतिरथो विघ्नराजार्चनं च ।

वासस्सन्धारणालङ्करणवितरणास्थापिधानोपवीत-

त्वग्धृत्याचान्तिमध्यागतिपरिधिवि[५]धानादिहोमाष्टकं च ।६५।।

त्र्यञ्जल्यापूर्तिहस्तग्रहणसवितृवीक्षाश्च कस्योक्त्यृगाव-

र्तेध्माधानाभिवादार्थनवितरणोङ्कारगायत्र्यर्धाती ।

हृन्मन्त्रोक्तिश्च मौञ्जीपरिणहनविधिस्तिष्ठतो दण्डदानं

प्रेषोक्तिस्स्विष्टकृद्धुत्यनुयजनमुखं[६] चान्ततश्चाभिवादः ।।६६।।

भिक्षादानार्पणे अप्यहनि विहितसन्ध्ये कुमारेऽथ रात्रौ

कृत्वा स्रुङ्मार्जनान्तं चरुपचनविधिं तन्निवेद्योपविष्टे ।

---

१. 'ह्यान्ताच्च कर्मा' ख. ग. २. 'यः' ख. ३. 'नस्स' ख. ग. ४. 'देवोक्ष्यादिस्त्र' क; 'देवोक्त्यादिस्त्र' ख. ५. 'निधा' ख. ६. 'स्वक्षा' ख.

---

* इदं वाक्यं कखपाठयोर्नास्ति । ** इदं वाक्यं कखपाठयोर्नास्ति ।

आघारान्ते[१] च दानं हुतिरपि सदसादिग्भिः स्विष्टकृत्का-

[२]द्यन्तं होमक्रियैधोहुतिरवनिसुरान् भोजयित्वा[३]र्थदश्च ।।६७।।

* उपनयनम् ।

नान्दी च पुण्याहविधिः[४] पलाशं सम्प्राप्य तत्प्रोक्षणदानसेकाः ।

दण्डादि[५]हानं च धृतिस्त्वगादेः पुण्याहकर्मापि दिने चतुर्थे ।।६८।।

** ദണ്ഡപാലക—(दण्डहानम्।)

अन्वाधानमुखं चरन् सह घृतं संस्कृत्य दध्यन्वितान्

सक्तूनाघृतभागतो घृतहुती ऋग्भिश्च सक्त्वाहुतीः ।

कृत्वा स्विष्टकृतो[६]ऽवदानसमये भक्षार्थमप्युद्धरन्

धर्म्यन्तेऽशनकृद्विमार्ज्य च वटावग्रेऽभिवाद्या[७]सिते ।।६९।।

कूर्चं वारिगतं धरन्नृषिमुखं तारं च गायत्रिका-

माद्यं सूक्तमथान्तिमर्चमपि तामध्यापयेत क्रमात् ।

शिष्टं होमविधिं समाप्य निवसन्नध्यायवर्जं त्र्यहं

विघ्नेशा[८]र्चनदानकृच्छुभदिने वेदः समारभ्यताम् ।।७०।।

*** ഉപാകർമ്മം—(उपाकर्म ।)

---

१. 'न्तं' ख. २. 'द्यान' ख, ग. ३. 'त्वार्चना च' ख, ग. ४. 'धि प' ख
५. 'दान' क. ६. 'तोऽव' ख. ७. 'द्य स्थिते' ग. ८. 'दि' ख.

---

* इदं वाक्यं कखपाठयोर्नास्ति । ** इदं वाक्यं कखपाठयोर्नास्ति ।
*** इदं वाक्यं कखपाठयोर्नास्ति ।

मुहूर्तं वापयित्वा स्रुङ्मार्जनान्तेऽन्तरागते ।

कस्योवत्यन्तव्रतादेशौ[1] कुर्यात् स्विष्टकृदाद्यथ[2] ॥७१॥

* വ്രതം കൊള്ളുക —(व्रतादानम् ।)

अब्दान्तेऽपि मनुं निरूप्य सतिलं[3] पक्त्वा चरुं स्रुङ्मृजां

कृत्वा तं गुरवे निवेद्य विरते शिष्येऽन्तरानीयताम्[4] ।

कृत्वा मुखप्रहुतीन्[5] वापि समवत्ते स्विष्टकृत्यभकं

प्रेष्यन् भोजयतां[6] प्रदाप्य सलिलं सूर्येक्षिणं वाचयेत् ॥७२॥

संछाद्याक्ष्यनुशास्य होममखिलं तं स्विष्टकृत्पूर्वकं

कुर्यात् प्रातरमुं बहिर्निहितयन्नग्नि परिस्तीर्य च ।

आसाद्या[7]सिमुखं समर्च्य च सन्निद्धो[8]नेऽभिवाद्यासिते

शिष्ये प्रेष्यति तं पुरीषपदकं[9] संश्राव्य सूर्यादिकान् ॥७३॥

सन्दर्श्या[10]ग्निदृग्[11]जपेच्च सवटुर्वह्निं समर्च्योत्सृजे-

द्धुत्वंधो वचनीय[12]होममपि माहानाम्निकेऽप्याचरेत् ।

---

१. 'कान्ते व' ख. २. 'रान्तया' ग. ३. 'सलिलं' क ख. ४. 'य तम्' ख ग. ५. 'वाप' । ग. ६. 'तान्' ग ७. 'वाति' क. 'द्यान्त्र' ख. ८. 'द्यान्वि' ख. ९. 'पकादं' १०. 'सन्दश्य' ख. ११. 'मृग्ज' ख., 'मृड्ख' ग. १२. 'पच' क.

---

* इदं वाक्यं कखपाठयोर्नास्ति ।

एवं द्वे च महाव्रतौपनिषदे कुर्याद् व्रतादेशना-

दूहित्वा[1] वचनादि[2] चानुवचनाद्यान्ताच्च कर्माचरेत् ॥७४॥

* വ്രതം മുടക്ക—(व्रतसमापनम् ।)

पुण्याहान्तचतुष्ककृद्धुतवहाधानादि चौलोक्तव-

न्मुख्याहुत्यवधि विधाय वपतु श्मश्रूणि तुन्दन्मुखम्[3] ।

श्मश्रूणीति वदन् क्षुरोक्तवचसोस्तं[4] वापयित्वाप्लुते

कुर्यात् स्विष्टकृदादि चाग्निसमिदाधात्रेऽथ[5] रात्रौ वटुः ॥७५॥

गोयुग्मं गुरवे ददातु समिदाधानात् पुराथो परे-

ऽह्न्यान्तात् क्षौरमुखं करोतु विधिवद् गोदानसंज्ञं व्रतम् ।

** ഗോദാനം—(गोदानम् ।)

विघ्नार्चागुरुदक्षिणे अथ[6] चरन् पुण्याहपर्यन्तकृ-[7]

च्छाखालूः पशुदानकृद्धुतवहाधानादि कुर्यात् स्वयम् ॥७६॥

सादे कुण्डलपूर्वकाण्यपि समासाद्याथ धात्रासने[8]

मुख्याहुत्यवधौ स्वयं तु वपनं कुर्वीत मन्त्रोहकृत् ।

स्नात्वा क्लीतकयुग्विसृज्य रशनाद्यागत्य वासोयुगं

धृत्वाङक्त्वा धृतकुण्डलो वितरणं कृत्वानुलिप्य स्रजम् ॥७७॥

---

१. 'घू' ग. २. 'वप' ख. ग. ३. 'तुन्द' क. ४. 'राणि च वसो' क.
५. 'धानाग्रे ख. ६. 'इह चरेत पु' ख. ७. 'हवत्मन्ति' ख. ८. 'धौ' क. 'धो' ग.

---

* इदं वाक्यं कखपाठयोर्नास्ति । ** इदं वाक्यं कखपाठयोर्नास्ति ।

धृत्वोपानहमातपत्रालकुटौ मुक्त्वा तथोष्णीषकं

त्यक्त्वोपानहमादधीत समिधं छिन्नां पुरान्या अपि ।

आन्तात्[१] स्विष्टकृदादिहोममखिलं कुर्यात् समावर्तने

स्वाध्यायं च समारभेत विधिवत्तुर्ये दिने स्नातकः ॥७८॥

* समावर्तनम् ।

स्नात्वावच्छेदधारी[२] स्नपनवपनकृत् प्रेतमुक्षेन्निशाद्भिः

कौपीनाच्छादितं भूषितमपि नलदैर्वाससाच्छाद्य बध्वा ।

नीत्वाधो वीतचूडाश्लथनयुगुदकं न्यस्य तेनाथ चित्यां

शम्यापेति निरुक्षेच्चितिकृदनलमाधाय पर्यास्तृणीत ॥७९॥

न्यस्यापः प्रेतमारोप्य च जनितघृतो[३] द्वे तु पर्यग्न्य चोत्पू-

यामृष्टस्रुग्दलोप[४]स्थितिकृदिम[५]मृचाथोपवीत्यग्निमर्चेत् ।

प्राचीनावीत्यथारयेत् समिधमपि जुहोत्वग्निकामौ चलोकं

ऊन्तानुक्त्वा यथाविध्यनुमतय इति प्रेतवक्षस्थलेऽग्ने ॥८०॥

हुत्वास्मान्मन्त्रतः स्रावितसकलघृतस्तं स्रुवं तूदगग्रं

नासायां न्यस्य दर्भैरनलमुपनिधायाग्निमित्यन्यविप्रम् ।

---

१. 'आन्तो' ख. २ 'कारी' क. ३. 'जहितद्घतो' ग. ४. 'रुज' ग.
५ 'दिवम्' क.

---

* इद वाक्यं कपाठे नास्ति ।

+ इतोऽनन्तरं खपाठे 'आप्लुत्योद्घृत०' (श्लो० ८३) इत्यारभ्यते ।

उक्त्वासौ वा स्वयं वा ज्वलयतु सलिलं प्रास्य चोपस्थितोऽथ
प्रेह्याद्यैर्मार्जितापो घटधृगथ परीत्येममित्याव्रजेच्च ॥८१॥
प्रेहीति द्वे च मैनं षट् पूषा त्वाथोपसर्प च ।
चतस्रः सोम एकेभ्यः पञ्चैकोरूणसाविति ॥८२॥

* സംസ്കാരം—(अन्त्येष्टिः ।)

आप्लुत्योद्धृतमृद्विलिप्य च मृदं न्युप्योल्लिखन्नास्तृणन्
दर्भानर्चनपूर्वकृच्च बलिवत्स्नात्वा तिलाम्भो दिशेत् ।
तोयादींश्च दिशन् प्रदक्षिणकृतो वाससिशखाम्भः क्षिपेत्
स्नात्वाश्मानलगोमयाक्षतमथो तैलं जलं च स्पृशेत् ॥८३॥

** उदकक्रिया ।

इत्थं द्विस्तिलवारिदानबलिकृन्नीत्वा दशाहं[1] गणे-
शार्चा चित्तसदानपिण्डविधिकृत् पुण्याहशुद्धो भवेत् ।

*** പിണ്ഡം—(पिण्डम् ।)(?)

वामावीः पयसा समुक्ष्य चयनं त्रिस्संविभज्यास्थि तत्
सञ्चित्य त्रिषु भाजनेषु पयसा संक्षाल्य कुम्भे क्षिपेत् ।
नीत्वा प्रेतवदेतदाचमनकृत् खात्वा निधायापिधा-
[2]योपस्थाय तिलोदकादिकृदथ श्राद्धं चयाङ्गं चरेत् ॥८४॥

**** സഞ്ചയനം—(चयाङ्गश्राद्धम् ।)

---

१. 'हर्ग' ख.　　२. 'यावस्था' ग

---

* इदं वाक्यं कखपाठ्योर्नास्ति ।　　** इदं वाक्यं कखपाठ्योर्नास्ति ।
*** इदं वाक्यं कखपाठ्योर्नास्ति ।　　**** इदं वाक्यं कखपाठ्योर्नास्ति ।

*अभ्युक्ष्याथ न्यसेद्वामे दक्षिणे च तृणत्रयम् ।
वामे तृणत्रयं न्यस्येत् कव्यं स्फ्यं च स्रुवं ध्रुवाम् ॥
तृणं च मेक्षणं चैव कुर्यादथ कमण्डलम् ॥८५॥

सम्तासाद्य[1] च कुण्डिकामथ समुत्तान्योक्ष्य पुष्पं क्षिप-[2]
न्नापूर्याथ तिलादिमार्प्य विधिवत्[3]प्रोत्तान्य चौक्ष्याखिलम् ।

आलिख्यौक्ष्य कुशांस्तृणत्रिह समाराध्याज्यसम्पादने
कव्योपस्तृतिरर्पिते पुनरवाक् चोपस्तृतेऽस्येत् तिलान् ॥८६॥

संसाद्याञ्जनपूर्वकाणि कशिपौ[4] दर्भेऽपि चाराधये-
देवं त्रिस्त्वनुपव्ययन्नपि[5] पुनस्त्रिस्त्रिर्जलादीन् दिशेत् ।

कंसासाद्युपवीय विप्रमभिवाद्याथानुपव्याधान ए-
वोपामन्त्र्य कृताङ्घ्रिशौच[6] उपवीयाचान्तितोयं दिशेत् ॥८७॥

स्वाचम्यानुपवीर्निवेश्य जलपूर्वान्त्यं क्षिपेद्विष्टरं[7]
प्रोत्तान्यौक्ष्य सुपूर्य[8] वन्दनकृतौ क्षिप्त्वा तिलादीनिह ।

---

१. 'खय' ग. २. 'पेरा' ख. ३. 'निदधतो' ख. ४. 'पात्रग्रे' ख. ग.
५. 'राय' ख. ६. 'च करशौचाथोपवीयाचमेत्' ख. ७. 'दिशेद्वि' ख.
८. 'र्य चाचितिलाद्य' कंसमाच्छादयेत्' ख.

---

* खगपाठयोः पद्यमिदं नास्ति ।

आच्छाद्याचर्य कृताञ्जलिर्ददप: सन्दर्श्य दत्त्वा जलं

सोपव्या[2]न इहार्घ्यदानकृदथो धारां प्रवन्देत[3] च ।।८८।।

दत्ताम्बुर्विहितोक्षणस्त्वनुपवी: न्यस्तोक्षिते ते त्यज-

न्नाच्छाद्याचर्य कृताञ्जलिश्च जलपूर्वान्त्यं दिशेच्चन्दनम् ।

पु[4]ष्पं माल्यकमञ्जनं च पटमित्येतांश्च पत्रद्वये-

ऽथोपस्तीर्य तिलैरर्पितेऽन्ननिहितिश्चोपस्तृतिश्चान्नयो: ।।८९।।

पत्रे न्यस्ततिलोऽथ मेक्षण उपस्तीर्या[5]वदायाञ्जनं

कृत्वा प्रत्यभिघार्य पाणिहुतिकृत्सोमादिकाभ्यां द्विश: ।

क्षिप्त्वौक्ष्यास्यतु मेक्षणं त[6]दुपवी: क्षिप्त्वान्नसर्पिस्ति[7]लं

दत्वोपस्तरणोदकं ह्यनुपवीरा[8]राधयन् वन्दताम् ।।९०।।

कृत्वा पिण्डमुपस्तृणन्नथ उपर्यम्भोमुखं यच्छतु

तिस्त्रि: पूर्णजलं प्रदाय निदधत्पिण्डं प्रवन्देत च ।

प्राणायाम्यभिवन्द्य भक्षणकृतौ द्विस्तोयदानान्तरं

तैलं चाञ्जनवाससी अपि चतुस्तोयं च गन्धादिकम् ।।९१।।

दत्वा प्राग्व[9]दथाञ्जलिं च कुसुमैरर्चेत् तृतीयेऽर्चने

तिष्ठन् वन्दनकृत् पुरोवदुपवीयाचर्यानुपव्यानवान् ।

---

१. 'आराध्याञ्जलिकज्जलं दद' ख., २. 'व्यानमथार्घ्य' ख 'व्यानमिहार्घ्य' ग.

३. 'त ताम्' ग. ४. 'व्यमथाञ्ज' ग. ५. 'योदनं ख, ६. 'न्वान्नुस' ख. ग.

७. 'लान्द' ख. ग. ८. 'रीयारा' ग. ९. 'थार्चनं' ग.

आराध्याम्बु ददद् यथोक्तमवदायाम्ब्वादियुक्तं बलिं
कृत्वा तोयददिः समर्च्य समुपावीयापिधानं दिशेत् ॥९२॥

आचान्ते कृतदक्षिणस्त्वनुपवीरर्घ्यं[1] विवृत्यार्चयन्
पिण्डं सस्पय[2]चरुस्रु[3]वध्रुवमथो[4]ऽभ्यङ्गाञ्जने चोत्सृजेत् ।

विस्रस्ते कशिपौ समुद्धृतबलिः[5] सोपव्ययन् विभ्रम-
तोत्थाप्याक्षतदोऽर्घ्यमार्जनकृतौ वामोपवीः कुण्डिकाम् ।
अस्येद्दर्भयुतां प्रदक्षिणनती तूपव्ययन्नाचरेद्
दातारं त्वनुवाच्य[6] चानुगृहितस्तं चाभिवन्द्या[7]न्वियात् * ॥९३॥

** ചടങ്ങിനാച്ഛാത്തം — (पिण्डम् ।)

†सीमन्तोपयमोपवीतिवपनस्नानाख्यगोदानके-
ष्वेतेष्वभ्युदयेऽन्यथा यदि कृते कुर्यात्तदावर्तनम् ।
सीमन्तञ्च तथाश्वलायनमते गोदानकर्माथवा
दीक्षायां यदि कार्यमत्र हि चरेद् दीक्षां समाप्यैव तत् ॥१॥

---

१. 'यार्घ्यं' ग. २. 'रु स्रु' ख. ग. ३. 'थाभ्य' ख. ग. ४. 'ञ्जनान्युत्सृ' ख.
५. 'तस्थौ' ख. ग. ६. 'नुयाप्य' ख. ग. ७. 'वाद्या' ग.

---

* इदं वाक्यं कखपाठयोर्नास्ति ।

** Colophon:—खपाठे—

ഇതു് മേല്പത്തൂർ ഭട്ടതിരി ഉണ്ടാക്കിയ ക്രിയാക്രമം ശ്ലോകം-ആശ്വലായനം. മഹാസാരം. ശുഭമസ്തു. गपाठे—

മേല്പത്തൂർ പട്ടേരിയുണ്ടാക്കിയ ശ്ലോകങ്ങൾ.

† इत आरभ्य आश्वलायनगृह्यप्रायश्चित्तविषयाः श्लोकाः कपाठे परं लिखिताः ।
तालपत्रेष्वन्येष्वथ पृथक् निर्दिष्टाः ।

आलेपाद्यनलाहितिश्च हविषो निर्वाप आज्यस्य वा-
थान्वाधेरपि देवतोक्तिरिति तान्युत्पत्तिकर्माण्यपि ।
कार्यं स्विष्टकृतः पुराग्निमुखतश्चोर्ध्वं प्रधानं मुहु-
र्तोक्तं चाविधिना कृतानि सकलान्येतानि चावर्तयेत् ॥२॥

अग्न्युत्पत्त्यन्यथात्वे तं त्यक्त्वा लेपादिकं चरेत् ।
विधिनैवाहितेऽप्यग्नौ नष्टेऽप्येवमसंस्कृते ॥३॥

शकलप्रोक्षणत्यागहस्तक्षाळनकर्मणाम् ।
नोत्पन्नित्व ततस्तेषां लोपादौ चित्तमेव हि ॥४॥

संस्कारा: प्रोक्षणाद्या हविषि निगदिताः सर्पिषोऽधिश्रयाद्या
अन्वाधानादयोऽग्नेः स्रुचि तपनमुखाः कर्तरि स्नानपूर्वाः ।
इध्मादेर्बन्धनाद्या यदि गतसमयास्ते पुनश्चित्तयुक्तं
कार्या द्रव्योपयोगात् पुरत इह परं प्रायश्चित्तमेव ॥५॥

कृतोपयोगप्रतिपादनं यदग्न्यादिके तत्प्रतिपत्तिरुक्ता ।
तस्यास्स्वकाले करणं सचित्तं स्याच्चित्तमेव प्रतिपाद्य नाशे ॥६॥

ब्रह्मप्रणीतेध्माधाराश्चक्षुषीव्याहृतीहुतिः ।
स्विष्टकृद्धर्म्यनूयाजाश्चित्तं चाङ्गाहुयानि हि ॥७॥

अतीतकालं सकलं समाप्तेः पुरा स्मृतं चित्तयुतं प्रकुर्यात् ।
प्रधानतः प्राग्विहितं प्रधानात् परं न कुर्यादिह चित्तमेव ॥८॥

समूहनादित्रितयं महान्तमिध्मस्य होमः परिधिश्च तेषाम् ।
इध्मात् परं चेत् करणं तदानीमिध्मादिकानां च पुनः कृतिः स्यात् ।।९।।

अन्वाधानसमूहनादिपरिधिब्रह्मप्रणीतामहा-
न्तेध्माद्यग्निमुखान्तकर्म सुकृतं नैकं प्रधानात् परम् ।
ज्ञातं चेत् प्रकृतं समाप्य पुनरप्यावर्तयेत् कृत्स्नशो
लोपे स्विष्टकृतोऽप्यसंस्कृतहविस्त्रुग्भिः कृतां चाहुतिम् ।।१०।।

आ स्विष्टकृतो येषां विस्मृतकरणादि कर्तव्यम् ।
तत्र प्रधानहोमं वेध्मादि वोक्तवत् पुनः कुर्यात् ।।११।।

प्रस्तराधारणे तत्र प्रधानानां तु कर्मणाम् ।
आवृत्तिः स्यात् तदन्येषां तत्तच्चित्तं समाचरेत् ।।१२।।

द्रव्याग्निकर्तृसंस्कारप्रतिपत्त्यङ्गकर्मणाम् ।
व्यत्यासादौ च लोपे च चित्तं व्याहृतयो भवेत् ।।१३।।

अन्वाधेर्देवतोक्तावपि सकलहविःसंस्कृतीनां क्रमस्य
व्यत्यासे विस्मृतानां पुनरपि करणे चावदानस्य नाशे ।
निर्वापाङ्गाहुतीनामपि च विनिमये देवतव्यांद्यनुक्तौ
त्वं नः स त्वं न ऋग्भ्यां हवनमिह हविःसंस्कृतीनां च लोपे।।१४।।

दुर्गादिर्वा बहूनामतिसमयकृतौ द्रव्यसंस्कारकाणां
चित्तं मिन्दादिको वा गण इह हविराज्योक्तसंस्कारकाणाम् ।

लुप्तं कर्तुं न शक्यं यदि भवति हुतिस्तारतो व्याहृतीभिः
प्राजापत्यादिको वा पुनरपि जुहुयाद् विस्मृतीनां बहुत्वे ॥१५॥

तारव्याहृतयोऽङ्गकर्मसु मनोर्लोपेऽतिरेकेऽथवा
चित्तं लुप्तमनु जपेदिह भवेत् पाह्यादिको भूयसाम् ।
आभिर्गीर्भिरिति स्वराक्षरपदेष्वेकस्य लोपेऽथ य-
त्पाकवाहुतिरूनता यदि भवेद् दर्भेध्मसंख्यादिषु ॥१६॥

संस्रावादौ प्रणीताद्युपगतपयसां स्यात् तृचेनाप आद्ये-
नापूर्तिः सर्वनाशे प्रणयनमुभयत्रापि चित्तं ततं मे ।
दर्भेध्मादेस्तु दाहाद्युपहतिषु तदुत्पाद्य कुर्यात् त्वमग्ने
प्राजापत्यं च नाशादिषु सकलहविस्स्रुग्घटादेस्तु भिन्दे ॥१७॥

लुप्तं कर्तुमशक्यत्वे प्रणवव्याहृतीरपि ।
जुहुयान्मन्त्रलोपे तं जप्त्वा पाह्यादिकं चरेत् ॥१८॥

देवतोक्त्यतिरेके स्याद् यद्वो देवास्रुवाहुतिः ।
अन्वाधौ चेत्पुनस्तस्यै स्रुवाहुतिरपीष्यते ॥१९॥

अन्यस्यै यदि निर्वपेद्विभजितं स्पृष्टं तदासादनात्
पूर्वं चेदिह पाणिनैव जुहुयान्नाम्ना चतुर्थ्यन्ततः ।
आसाद्य स्मरणे विभक्तमपि तत् स्पृष्टं प्रधानात्परं
जुह्वैवात्र जुहोतु सा यदि गृहीता तत्क्रमाद्वा हुतिः ॥२०॥

कुर्यादाग्रयणे त्वसादितमपि प्राग्वत् प्रधानात्परं
कुर्यात्तत्र पुरोक्तचित्तयुगळं वैश्वानरीं चाहुतिम् ।
पाकोर्ध्वं त्वभिमर्शने मनुममुष्मै त्वेत्यमुष्मै व इ-
त्यस्मात्प्राक् पुनराश्वलायनमते गृह्योदितो वा सदा ॥२१॥

निर्वापे पुनरन्यथा[1] सति कृते भूयोऽपि तैर्निर्वपेद्
द्रव्यैः प्रोक्षणतोऽप्यधिश्रयणतोऽप्यर्वाक् परं चेत्परः ।
क्षेप्यं पूर्वनिरुप्तमेतदनले तत्रेध्महोमात्परं
वैकल्यस्मरणे तु तेन हविषा कृत्वा चरेदादितः ॥२२॥

निर्वापस्य तु विस्मृतावपि पुनर्नाशादिके वा चरोः
कुर्यान्निर्वपणाद्यमिध्महवनात्पूर्वं स्मृतौ नो परम् ।
तत्राज्येन चरूक्तहोममखिलं कृत्वा तदावर्तये-
न्नाशादाविह पाकहीनहविषां कुर्यात् तदुत्पादनम् ॥२३॥

प्रधानारम्भोर्ध्वं युगपदखिलं यद्युपहतं
हविस्तत्राप्याज्यं नयतु विधिवत्तेन हवनम् ।
समाप्यावर्त्यं तच्छुचि यदि हविःष्वेकमिह तु
प्रधानेऽवत्तान्यन्नयतु यदि तत् पाकरहितम् ॥२४॥

त्यक्त्वा दुष्टमिहाप्सु दोषवशतः पात्रादिसंशोधनं
कृत्वाज्यादि हविर्यथार्हमखिलं चोत्पाद्य मृष्ट्वा स्रुचम् ।

---

1. 'यदि' इत्यपि पाठः ।

दुष्टोऽग्निर्यदि निष्कृतिं तदुदितां मिन्दे च कृत्वा पुरा
दुष्टेनात्र कृतं च कर्म सकलं शिष्टं च कुर्यात् पुनः ॥२५॥

हविर्नाशे तदुत्पत्ति केचिदास्विष्टकृद्धुतेः ।
कुर्युः प्रधानहोमार्थं नैव स्विष्टकृतः परम् ॥२६॥

आज्येन कार्ये सति पक्वहोमे
हुत्वा च मिन्दे च मनस्वतीं च ।
स्रुवेण जुह्वामवदाय कुर्यात्
पक्वाहुतिं तत्परिहोमवर्जम् ॥२७॥

एकावदानपतनाद्यभिघारणोर्ध्वं
स्याच्चेत्तदा स्रुचि गतं तु पृथङ्निधाय ।
भूयोऽवदाय जुहुयादभिघारणात् प्राङ्-
